# Shri Radhikadhyanamritastotram

# શ્રીરાધિકાધ્યાનામૃતસ્તોત્રમ્

## Document Information

Text title : rAdhikAdhyAnAmRRitastotram

File name : rAdhikAdhyAnAmRRitastotram.itx

Category : devii, radha, vishvanAthachakravartin, dhyAnam, stavAmRRitalaharI, devI

Location : doc_devii

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# શ્રીરાધિકાધ્યાનામૃતસ્તોત્રમ્

તડિચ્ચમ્પકસ્વર્ણકાશ્મીરભાસઃ
  સ્વકાન્ત્યા ભૃશં દણ્ડયિત્ર્યા વિલાસઃ ।
સ્વરૂપસ્ય તસ્યાસ્તુ વર્ણ્યઃ
  સુબોધદ્રવો નામવર્ણોઽપિ કર્ણ્યઃ ॥ ૧॥

પ્રફુલ્લકુસુમપ્રભાદ્યોતિતાનાં
  લસચ્ચન્દ્રિકાપ્રોતમેઘોપમાનામ્ ।
કચાનાં સચાતુર્યબન્ધેયમેણી
  દૃશઃ સચ્ચમર્યાગ્રિમા ભાતિ વેણી ॥ ૨॥

મહાનર્ઘ્યચૂડામણીકામલેખા
  પ્લુતા રાજતે ચારુસીમન્તરેખા ।
ઉડુદ્યોતિમુક્તૈકપઙ્ક્તિં વહન્તી
  કિમાસ્યેન્દુસૌધૈકધારોચ્ચલન્તી ॥ ૩॥

નવેન્દૂપમે પત્રપાશ્યાપ્રભાલે
  સુલીલાલકાલીવૃતે ચારુભાલે ।
મદેનાન્તરા ચિત્રિતં ચિત્રકં તત્
  વિભાત્યચ્યુતાતૃપ્તનેત્રૈકસમ્પત્ ॥ ૪॥

અતિશ્યામલા વિજયકન્દર્પચાપ
  પ્રભાજિષ્ણુતાં ભ્રૂદ્વયી કુઞ્ચિતાપ ।
મુખામ્ભોજમાધ્વીકપાનાદભીષ્ટા-
  દયેષ્ટાલિપઙ્ક્તિઃ કિમેષા નિવિષ્ટા ॥ ૫॥

સફર્યાવિવ પ્રેષ્ઠલાવણ્યવન્યે
  પ્સિતે રાજતસ્તે દૃશૌ હન્ત ધન્યે ।
લસત્કજ્જલાક્તે તયોઃ શ્યામપક્ષ્મ
  ક્વચિદ્વિન્દતે કાન્તતામ્બૂલલક્ષ્મ ॥ ૬॥

તડિત્કન્દલી મૂર્ધ્નિ નક્ષત્રયુક્તા
　　સ્થિરાધઃસુધાબુદ્બુદદ્વન્દ્વસક્તા ।
યદિ સ્યાત્સરોજાન્તરે તાં ચ ભાસા
　　મૃગાક્ષ્યાસ્તિરસ્કુર્વતી ભાતિ નાસા ॥ ૭॥

કપોલાક્ષિબિમ્બાધરશ્રીવિષક્તં
　　બહિર્મૌક્તિકં પીતનીલાતિરક્તમ્ ।
સ્મિતોદ્યત્પુટોદીર્ણમાધુર્યવૃષ્ટિ-
　　ર્લસત્યચ્યુતસ્વાન્તતર્ષૈકસૃષ્ટિઃ ॥ ૮॥

લસત્કુણ્ડલે કુણ્ડલીભૂય મન્યે
　　સ્થિતે કામપાશાયુધે હન્ત ધન્યે ।
શ્રુતી રત્નચક્રીશલાકાઞ્ચિતાગ્રે
　　દૃશૌ કર્ષતઃ શ્રીહરયે સમગ્રે ॥ ૯॥

અતિસ્વચ્છમન્તઃસ્થતામ્બૂલરાગ-
　　ચ્છટોદ્ગારિ શોભામ્બુધૌ કિં લલાગ ।
કપોલદ્વયં લોલતાટઙ્કરત્ન
　　દ્યુમચ્ચુમ્બિતં પ્રેયસો યત્ર યત્નઃ ॥ ૧૦॥

સ્ફુટદ્વન્ધુજીવપ્રભાહારિદન્ત-
　　ચ્છદદ્વન્દ્વમાભાતિ તસ્યા યદન્તઃ ।
સ્મિતજ્યોત્સ્નયા ક્ષાલિતં યા સતૃષ્ણં
　　ચકોરીકરોત્યત્યન્વહં હન્ત કૃષ્ણમ્ ॥ ૧૧॥

ન સા વિન્દતે પાકિમારુણ્યભાજિ-
　　ચ્છવિર્યત્તુલાં દાડિમીબીજરાજિઃ ।
કથં વર્ણ્યતાં યા ત્વિયં દન્તપઙ્ક્તિ-
　　ર્મુકુન્દાધરે પૌરુષં યા વ્યનક્તિ ॥ ૧૨॥

મુખામ્ભોજમાધુર્યધારા વહન્તી
　　યદન્તઃ કિયન્ નિમ્નતાં પ્રાપયન્તી ।
કિમેષા કસ્તૂરિકાબિન્દુભૃત્તં
　　હરિં કિં દધાનં વિભાત્યાસાવૃત્તમ્ ॥ ૧૩॥

સ કણ્ઠસ્તડિત્કમ્બુસૌભાગ્યહારી

ત્રિરેખઃ પિકસ્તવ્યસૌસ્વર્યધારી ।
સ્રજં માલિકાં માલિકાં મૌક્તિકાનાં
દધત્યેવ યઃ પ્રેયસા ગુમ્ફિતાનામ્ ॥ ૧૪॥

ઉરોજદ્વયં તુઙ્ગતાપીનતાભ્યાં
સમં સખ્યયુક્ કૃષ્ણપાણ્યમ્બુજાભ્યામ્ ।
નખેન્દુર્યદોદેતુમિચ્છાં વિધત્તે
તદા કઞ્ચુકી કાલિકા નાપિ ધત્તે ॥ ૧૫॥

મ્રદિમ્ણા શિરીષસ્ય સૌભાગ્યસારં
ક્ષિપન્ત્યા વહન્ત્યા ભુજાભોગભારમ્ ।
તુલાશૂન્યસૌન્દર્યસીમાં દધત્યા
નિજપ્રેયસેઽજસ્રસૌખ્યં દદત્યાઃ ॥ ૧૬॥

શ્રિતાયાઃ સ્વકાન્તસ્વતાં કમ્રગાત્ર્યાઃ
શ્રિયાઃ શ્રીવિલાસાન્ ભૃશં ખર્વયન્ત્યાઃ ।
ગતાંસદ્વયી સૌભગૈકાન્તકાન્તં
યદા પાણિનોત્કામયેતિ સાલકાન્તમ્ ॥ ૧૭॥

તડિદ્ધામભૃત્કઙ્કણાનદ્ધસીમા
ઘનદ્યોતચૂડાવલી સાસ્ત્રસીમા ।
ચકાસ્તિ પ્રકોષ્ઠદ્વયે યા સ્વનન્તી
સ્મરાજૌ સુખાબ્ધૌ સખીઃ પ્લાવયન્તી ॥ ૧૮॥

તદ્ભાતિ રક્તોત્પલદ્વન્દ્વશોચિ-
સ્તિરસ્કારિપાણિદ્વયં યત્ર રોચિઃ ।
શુભાઙ્કાવલેઃ સૌભગં યદ્વ્યનક્તિ
પ્રિયાન્તર્હૃદિ સ્થાપને યસ્ય શક્તિઃ ॥ ૧૯॥

(ચતુર્ભિઃ કુલકમ્)
નખજ્યોતિષા ભાન્તિ તાઃ પાણિશાખાઃ
કરોત્યૂર્મિકાલઙ્કૃતા યા વિશાખા ।
સમાસજ્ય કૃષ્ણાઙ્ગુલીભિર્વિલાસ-
સ્તદાસાં યદા રાજતે હન્ત રાસઃ ॥ ૨૦॥

જનિત્વૈવ નાભિસરસ્યુદ્ગતા સા
મૃણાલીવ રોમાવલિર્ભાતિ ભાસા ।

સ્તનચ્છદ્મનૈવામ્બુજાતે યદગ્રે
  મુખેન્દુપ્રભામુદ્રિતે તે સમગ્રે ॥ ૨૧॥

કૃશં કિં નુ શોકેન મુષ્ટિપ્રમેયં
  ન લેભે મણિભૂષણં યત્પિધેયમ્ ।
નિબદ્ધં વલીભિશ્ચ મધ્યં તથાપિ
  સ્ફુટં તેન સુસ્તવ્યસૌન્દાર્યમપિ ॥ ૨૨॥

ક્વનત્કિઙ્કિણીમણ્ડિતં શ્રોણીરોધઃ
  પરિસ્ફારિ યદ્વર્ણને ક્વાસ્તિ બોધઃ ।
કિયાન્વા કવેર્હન્ત યત્રૈવ નિત્યં
  મુકુન્દસ્ય દૃક્ખઞ્જનોઽવાપ નૃત્યમ્ ॥ ૨૩॥

પ્રિયાનઙ્ગકેલિભરૈકાન્તવાટી
  પટીવ સ્ફુરત્યઞ્ચિતા પટ્ટશાટી ।
વિચિત્રાન્તરીયોપરિ શ્રીભરેણ
  ક્ષિપન્તી નવેન્દીવરાભામ્બરેણ ॥ ૨૪॥

કદલ્યાવિવાનઙ્ગમાઙ્ગલ્યસિદ્ધૌ
  સમારોપિતે શ્રીમદૂરૂ સમૃદ્ધૌ ।
વિભાતઃ પરં વૃત્તતાપીનતાભ્યાં
  વિલાસૈર્હરેઃ ચેતનાહારિ યાભ્યામ્ ॥ ૨૫॥

વિરાજત્યહો જાનુયુગ્મં પટાન્તઃ
  સમાકર્ષતિ દ્રાગથાપ્યચ્યુતાન્તઃ ।
યદાલક્ષ્યતે તત્ર લાવણ્યસમ્પત્
  સુવ્રિત્તં લસત્કાનકં સમ્પુટં તત્ ॥ ૨૬॥

તનુત્વં ક્રમાન્મૂલતશ્ચારુજઙ્ઘે
  પ્રયાતઃ પરિપ્રાપ્તસૌભાગ્યસઙ્ઘે ।
પદામ્ભોજયોર્નાલતા ધારયન્ત્યૌ
  સ્વભામન્તરીયાન્તરે ગોપયન્ત્યૌ ॥ ૨૭॥

જયત્યઙ્ઘ્રિપઙ્કેરુહદ્વન્દ્વમિષ્ટં
  દલાગ્રે નખેન્દુવ્રજેનાપિ હૃષ્ટમ્ ।
ક્વનન્નૂપુરં હંસકારાવભક્તં
  હરિં રઞ્જયત્યેવ લાક્ષારસાક્તમ્ ॥ ૨૮॥

દરામ્ભોજતાટઙ્કવલ્લીરથદ્યૈ-
    ર્મહાલક્ષનૈર્ભવ્યવૃન્દાભિવાદ્યૈઃ ।
યુતં યત્તલં માર્દવારુણ્યશાલિ
    સ્મૃતં યદ્ભવેદચ્યુતાભીષ્ટપાલિ ॥ ૨૯॥

પ્રિયે શ્યામલો લેઢુભૃઙ્ગો નલિન્યા
    મરન્દં પરં દન્દશીતિ ક્ષુદન્યા ।
યદેતં બતેત્યચ્યુતોક્ત્યાઞ્ચલાન્ત-
    ર્મુખાબ્જે સિતેન્દું દધે સાલકાન્તઃ ॥ ૩૦॥

તમાલમ્બ્ય લબ્ધૌજસો માધવસ્ય
    સ્ફુટં પાણિચાપલ્યમલ્પં નિરસ્ય ।
તયા સ્વાધરઃ સાધુ કર્પૂરલિપ્તઃ
    કૃતો નેતિ નેત્યક્ષરોદ્ગારદીપ્તઃ ॥ ૩૧॥

સ જાગર્તિ તસ્યાઃ પરિવારચેત-
    સ્તટેઽનુક્ષણં રમ્યલીલાસમેતઃ ।
અથાપ્યષ્ટયામિક્યમુષ્યાઃ સપર્યા
    યથાકાલમાચર્યતે તેન વર્યા ॥ ૩૨॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
        શ્રીરાધિકાધ્યાનામૃતસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Radhikadhyanamritastotram*

pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*